कल्याणि ! सोऽमृतानन्त्यमश्नुते'' भा०व०प०२१अ० ।

**आनन्द** पु० आ+नन्द–घञ् । १हर्षे सुखे, २दुःखाभावे, ३ब्रह्मणि च । अर्श आदित्वादच् । ४आनन्दवति त्रि० "सत्यं ज्ञानमानन्दं ब्रह्मेति श्रुतिः । नैयायिका आनन्दशब्दः दुःखाभावे लाक्षणिकइत्याहुः ब्रह्मणि आनन्दाभावेऽपि दुःखाभावरूपानन्दस्य तत्र सत्त्वात् आनन्दवत्त्वमिति ते मन्यन्ते वेदान्तिनस्तु छान्दसं नपुंसकमिति आनन्दस्वरूपत्वमेव ब्रह्मणः दुःखाभावरूपस्यानन्दस्याधिकरणस्वरूपत्वादित्याहुः एतदभिप्रायेणैव विवरणे "आनन्दोविषयानुभवो नित्यत्वञ्चेति सन्ति-धर्म्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते इत्युक्तम्" यथा च ब्रह्मण आनन्दप्रचुरत्वादानन्दमयत्वं तथा "आनन्दमयोऽभ्यासात्" शा०सू०भा० व्यवस्थापितम् तैत्ति०उप० आनन्दमयं प्रकृत्य "तस्य प्रियमेव शिरो-मोदोदक्षिणः पक्षः प्रमोद उत्तरःपक्षः आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा" । "तस्याप्यानन्दमयस्यात्मन इष्टपुत्रादिदर्शनजं प्रियं शिर इव शिरः प्राधान्यात् । मोद इति प्रियलाभनिमित्तो हर्षः । स एव च प्रकृष्टो हर्षः प्रमोदः । आनन्द इति सुखसामान्यम्, आत्मा प्रियादीनां सुखावयवानां तेष्वनुस्यूतत्वादानन्द इति परं ब्रह्म । तद्धि शुभकर्म्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधावन्तःकरणवृत्तिविशेषे तमसा । प्रच्छाद्यमाने प्रसन्नेऽभिव्यज्यते तद्विषयसुखमिति प्रसिद्धं लोके । तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्म्मणोऽनवस्थितत्वात् सुखस्य क्षणिकत्वम् । तद्यदन्तःकरणं तपसा तमोघ्नेन, विद्यया, ब्रह्मचर्य्येण, श्रद्धया च निर्म्मलत्वमापद्यते यावत्तावद्विविक्ते प्रसन्नेऽन्तःकरणविशेष आनन्द उत्कृष्यते विपुलीभवति । वक्ष्यति च "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति एष ह्येवानन्दयाति" "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति" श्रुत्यन्तरात् एवञ्च कामोपशमोत्कर्षापेक्षया शतगुणोत्तरोत्तरोत्कर्ष आनन्दस्य वक्ष्यते । एवञ्चोत्कृष्यमाणस्यानन्दमयस्यात्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव यत्प्रकृतं सत्यज्ञानानन्दलक्षणं यस्य च प्रतिपत्त्यर्थं पञ्चान्नादिमयाः कोशा उपन्यस्ताः । यच्च तेभ्योऽभ्यन्तरं येन च ते सर्वे आत्मवन्तस्तद्ब्रह्म पुच्छं प्रतिष्ठाः" भा० ब्रह्मण आनन्दरूपरसत्वमपि तत्रैव दर्शितं यथा "यद्वैतत् सुकृतं रसो वै सः रसं ह्येवाऽयं लब्ध्वानन्दी भवति कोह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयाति यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते" तै० उ० । "कुतो रसत्वप्रसिद्धिर्ब्रह्मण इत्यत आह । यद्वैतत् सुकृतं रसो वै सः । रसो नाम तृप्तिहेतुरानन्दकरो मधुराम्लादिः प्रसिद्धो लोके । रसमेवायं लब्ध्वा प्राप्यानन्दी सुखी भवति नासत आनन्दहेतुत्वं दृष्टं लोके । बाह्यानन्दसाधनरहिता अप्यनीहा निरेषणा ब्राह्मणा बाह्यरसलाभादिव सानन्दा दृश्यन्ते विद्वांसो नूनम् । ब्रह्मैव रसस्तेषाम् तस्मादस्ति तेषामानन्दकारणं रसवद्ब्रह्म । इतश्चास्ति कुतः । प्राणनादिक्रियादर्शनात् । अयमपि हि पिण्डो जीवतः प्राणेन प्राणिति अपानेनापानिति । एवं वायवीया ऐन्द्रियकाश्च चेष्टाः संहतैः कार्य्यकारणैर्निर्वर्त्यमाना दृश्यन्ते । तच्चैकार्थवृत्तित्वेन संहननम् संहन्यमानं च नान्तरेण चेतनं संहतं सम्भवति अन्यत्रादर्शनात् । तदाह यद्यदि एष आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्यात् न भवेत्को ह्येव लोकेऽन्यादपानचेष्टां कुर्य्यादित्यर्थः । कः प्राण्यात् प्राणनं कुर्य्यात्तस्मादस्ति तद्ब्रह्म । यदर्थाः कार्य्यकारणप्राणनादिचेष्टा? तत्कृत एवानन्दो लोकस्य । कुतः ! एष ह्येव पर आत्मा आनन्दयाति आनन्दयति सुखयति लोकं धर्मानुरूपम् । स एवात्मानन्दरूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थः" भा० । सर्वानन्दापेक्षया ब्रह्मरूपानन्दस्योत्कर्षस्तत्रैव दर्शितो यथा "सैषानन्दस्य मीमांसा भवति । युवा स्यात् साधुयुवाध्यायिकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः स एको देवगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः स एकः पितॄणां चिरलोकानामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितॄणां चिरलोकानामानन्दाः । स एक आजानजानां देवानामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानन्दाः स एकः कर्म्मदेवानामानन्दः ये कर्म्मणा देवानपि यन्ति, श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्म्मदेवानामानन्दाः स एको देवानामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं